श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્દ્ભાગવત રસિક કુટુંબ

## UG-11.23 - પંચમ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(વઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**
**એકાદશઃ સ્કન્ધઃ**
**.. અથ ત્રયોવિં(મ્)શોઽધ્યાયઃ - ૨૩ ..**

**બાદરાયણિરુવાચ**
**સ એવમાશં(મ્)સિત ઉદ્ધવેન**
**ભાગવતમુખ્યેન દાશાર્હમુખ્યઃ .**
**સભાજયન્ ભૃત્યવચો મુકુન્દ-**
**સ્તમાબભાષે શ્રવણીયવીર્યઃ .. ૧..**

**શ્રીભગવાનુવાચ**
**બાર્હસ્પત્ય સ વૈ નાત્ર, સાધુર્વૈ દુર્જનેરિતૈઃ .**
**દુરુક્તૈર્ભિન્નમાત્માનં(યઁ), યઃ(સ્) સમાધાતુમીશ્વરઃ .. ૨..**

ન તથા તપ્યતે વિદ્ધઃ(ફ્), પુમાન્ બાણૈઃ(સ્) સુમર્મગૈઃ .
યથા તુદન્તિ મર્મસ્થા, હ્યસતાં(મ્) પરુષેષવઃ .. ૩..

કથયન્તિ મહત્પુણ્ય-મિતિહાસમિહોદ્ધવ .
તમહં(વ્ઁ) વર્ણયિષ્યામિ, નિબોધ સુસમાહિતઃ .. ૪..

કેનચિદ્ ભિક્ષુણા ગીતં(મ્), પરિભૂતેન દુર્જનૈઃ .
સ્મરતા ધૃતિયુક્તેન, વિપાકં(ન્) નિજકર્મણામ્ .. ૫..

અવન્તિષુ દ્વિજઃ(ખ્) કશ્ચિ-દાસીદાઢ્યતમઃ(શ્) શ્રિયા .
વાર્તાવૃત્તિઃ(ખ્) કદર્યસ્તુ, કામી લુબ્ધોઽતિકોપનઃ .. ૬..

જ્ઞાતયોઽતિથયસ્તસ્ય, વાઙ્માત્રેણાપિ નાર્ચિતાઃ .
શૂન્યાવસથ આત્માપિ, કાલે કામૈરનર્ચિતઃ .. ૭..

દુઃ(શ્)શીલસ્ય કદર્યસ્ય, દ્રુહ્યન્તે પુત્રબાન્ધવાઃ .
દારા દુહિતરો ભૃત્યા, વિષણ્ણા નાચરન્ પ્રિયમ્ .. ૮..

તસ્યૈવં(યઁ) યક્ષવિત્તસ્ય, ચ્યુતસ્યોભયલોકતઃ .
ધર્મકામવિહીનસ્ય, ચુક્રુધુઃ(ફ્) પં(ઞ્)ચભાગિનઃ .. ૯..

તદવધ્યાનવિસ્રસ્ત-પુણ્યસ્કન્ધસ્ય ભૂરિદ .
અર્થોઽપ્યગચ્છન્નિધનં(મ્), બહ્વાયાસપરિશ્રમઃ .. ૧૦..

જ્ઞાતયો જગૃહુઃ(ખ્) કિં(ઞ્) ચિત્, કિં(ઞ્)ચિદ્ દસ્યવ ઉદ્ધવ .
દૈવતઃ(ખ્) કાલતઃ(ખ્) કિં(ઞ્)ચિદ્, બ્રહ્મબન્ધોર્નૃપાર્થિવાત્ .. ૧૧..

સ એવં(ન્) દ્રવિણે નષ્ટે, ધર્મકામવિવર્જિતઃ .
ઉપેક્ષિતશ્ચ સ્વજનૈશ્ - ચિન્તામાપ દુરત્યયામ્ .. ૧૨..

તસ્યૈવં(ન્) ધ્યાયતો દીર્ઘં(ન્), નષ્ટરાયસ્તપસ્વિનઃ .
ખિદ્યતો બાષ્પકણ્ઠસ્ય, નિર્વેદઃ(સ્) સુમહાનભૂત્ .. ૧૩..

સ ચાહેદમહો કષ્ટં(વ્ઁ), વૃથાઽઽત્મા મેઽનુતાપિતઃ .
ન ધર્માય ન કામાય, યસ્યાર્થાયાસ ઈદૃશઃ .. ૧૪..

પ્રાયેણાર્થાઃ(ખ્) કદર્યાણાં(ન્), ન સુખાય કદાચન .
ઇહ ચાત્મોપતાપાય, મૃતસ્ય નરકાય ચ .. ૧૫..

યશો યશસ્વિનાં(મ્) શુદ્ધં(મ્), શ્લાઘ્યા યે ગુણિનાં(ઙ્) ગુણાઃ .
લોભઃ(સ્) સ્વલ્પોઽપિ તાન્ હન્તિ, શ્વિત્રો રૂપમિવેપ્સિતમ્ .. ૧૬..

અર્થસ્ય સાધને સિદ્ધે, ઉત્કર્ષે રક્ષણે વ્યયે .
નાશોપભોગ આયાસસ્-ત્રાસશ્ચિન્તા ભ્રમો નૃણામ્ .. ૧૭..

સ્તેયં(મ્) હિ(મ્)સાનૃતં(ન્) દમ્ભઃ(ખ્), કામઃ(ખ્) ક્રોધઃ(સ્) સ્મયો મદઃ .
ભેદો વૈરમવિશ્વાસઃ(સ્), સં(મ્)સ્પર્ધા વ્યસનાનિ ચ .. ૧૮..

એતે પં(ઞ્)ચદશાનર્થા, હ્યર્થમૂલા મતા નૃણામ્ .
તસ્માદનર્થમર્થાખ્યં(મ્), શ્રેયોઽર્થી દૂરતસ્ત્યજેત્ .. ૧૯..

ભિદ્યન્તે ભ્રાતરો દારાઃ(ફ્), પિતરઃ(સ્) સુહૃદસ્તથા .
એકાસ્નિગ્ધાઃ(ખ્) કાકિણિના, સદ્યઃ(સ્) સર્વેઽરયઃ(ખ્) કૃતાઃ .. ૨૦..

અર્થેનાલ્પીયસા હ્યેતે, સં(મ્)રબ્ધા દીપ્તમન્યવઃ .
ત્યજન્ત્યાશુ સ્પૃધો ઘ્નન્તિ, સહસોત્સૃજ્ય સૌહૃદમ્ .. ૨૧..

લબ્ધ્વા જન્મામરપ્રાર્થ્ય(મ્), માનુષ્યં(ન્) તદ્ દ્વિજાગ્ર્યતામ્ .
તદનાદૃત્ય યે સ્વાર્થ(ઙ્), ઘ્નન્તિ યાન્ત્યશુભાં(ઙ્) ગતિમ્ .. ૨૨..

સ્વર્ગાપવર્ગયોર્દ્વારં(મ્), પ્રાપ્ય લોકમિમં(મ્) પુમાન્ .
દ્રવિણે કોઽનુષજ્જેત, મર્ત્યોઽનર્થસ્ય ધામનિ .. ૨૩..

દેવર્ષિપિતૃભૂતાનિ, જ્ઞાતીન્ બન્ધૂં(મ્)શ્ચ ભાગિનઃ .
અસં(વ્ઁ)વિભજ્ય ચાત્માનં(યઁ), યક્ષવિત્તઃ(ફ્) પતત્યધઃ .. ૨૪..

વ્યર્થયાર્થેહયા વિત્તં(મ્) પ્રમત્તસ્ય વયો બલમ્ .
કુશલા યેન સિધ્યન્તિ, જરઠઃ(ખ્) કિં(ન્) નુ સાધયે .. ૨૫..

કસ્માત્ સં(ઙ્)ક્લિશ્યતે વિદ્વાન્, વ્યર્થયાર્થેહયાસકૃત્ .
કસ્યચિન્માયયા નૂનં(લ્ઁ), લોકોઽયં(મ્) સુવિમોહિતઃ .. ૨૬..

કિં(ન્) ધનૈર્ધનદૈર્વા કિં(ઙ્), કામૈર્વા કામદૈરુત .
મૃત્યુના ગ્રસ્યમાનસ્ય, કર્મભિર્વોત જન્મદૈઃ .. ૨૭..

નૂનં(મ્) મે ભગવાં(મ્)સ્તુષ્ટઃ(સ્), સર્વદેવમયો હરિઃ .
યેન નીતો દશામેતાં(ન્), નિર્વેદશ્ચાત્મનઃ(ફ્) પ્લવઃ .. ૨૮..

સોઽહં(ઙ્) કાલાવશેષેણ, શોષયિષ્યેઽઙ્ગમાત્મનઃ .
અપ્રમત્તોઽખિલસ્વાર્થે, યદિ સ્યાત્ સિદ્ધ આત્મનિ .. ૨૯..

તંત્ર મામનુમોદેરન્, દેવાસ્ત્રિભુવનેશ્વરાઃ .
મુહૂર્તેન બ્રહ્મલોકં(ઙ્) ખટ્વાં(ઙ્)ગઃ(સ્) સમસાધયત્ .. ૩૦..

શ્રીભગવાનુવાચ

ઇત્યભિપ્રેત્ય મનસા, હ્યાવન્ત્યો દ્વિજસત્તમઃ .
ઉન્મુચ્ય હૃદયગ્રન્થીન્, શાન્તો ભિક્ષુરભૂન્મુનિઃ .. ૩૧..

સ ચચાર મહીમેતાં(મ્), સં(યઁ)યતાત્મેન્દ્રિયાનિલઃ .
ભિક્ષાર્થં(ન્) નગરગ્રામા-નસં(ઙ્)ગોઽલક્ષિતોઽવિશત્ .. ૩૨..

તં(વ્ઁ) વૈ પ્રવયસં(મ્) ભિક્ષુ-મવધૂતમસજ્જનાઃ .
દૃષ્ટ્વા પર્યભવન્ ભદ્ર, બહ્વીભિઃ(ફ્) પરિભૂતિભિઃ .. ૩૩..

કેચિત્ત્રિવેણું(ઞ્) જગૃહુ-રેકે પાત્રં(ઙ્) કમણ્ડલુમ્ .
પીઠં(ઞ્) ચૈકેઽક્ષસૂત્રં(ઞ્) ચ, કન્થાં(ઞ્) ચીરાણિ કેચન .. ૩૪..

પ્રદાય ચ પુનસ્તાનિ, દર્શિતાન્યાદદુર્મુનેઃ .
અન્નં(ઞ્) ચ ભૈક્ષ્યસમ્પન્નં(મ્), ભું(ઞ્)જાનસ્ય સરિત્તટે .. ૩૫..

મૂત્રયન્તિ ચ પાપિષ્ઠાઃ(ષ્), ષ્ઠીવન્ત્યસ્ય ચ મૂર્ધનિ .
યતવાચં(વ્ઁ) વાચયન્તિ, તાડયન્તિ ન વક્તિ ચેત્ .. ૩૬..

તર્જયન્ત્યપરે વાગ્ભિઃ(સ્), સ્તેનોઽયમિતિ વાદિનઃ .
બધ્નન્તિ રજ્જ્વા તં(ઙ્) કેચિદ્, બધ્યતાં(મ્) બધ્યતામિતિ .. ૩૭..

ક્ષિપન્ત્યેકેઽવજાનન્ત, એષ ધર્મધ્વજઃ(શ્) શઠઃ .
ક્ષીણવિત્ત ઇમાં(વ્ઁ) વૃત્તિ-મગ્રહીત્ સ્વજનોજ્ઝિતઃ .. ૩૮..

અહો એષ મહાસારો, ધૃતિમાન્ ગિરિરાડિવ .
મૌનેન સાધયંત્યર્થં(મ્), બકવદ્ દૃઢનિશ્ચયઃ .. ૩૯..

ઇત્યેકે વિહસન્ત્યેન-મેકે દુર્વાતયન્તિ ચ .
તં(મ્) બબન્ધુર્નિરુરુધુર્-યથા ક્રીડનકં(ન્) દ્વિજમ્ .. ૪૦..

એવં(મ્) સ ભૌતિકં(ન્) દુઃખં(ન્), દૈવિકં(ન્) દૈહિકં(ઞ્) ચ યત્ .
ભોક્તવ્યમાત્મનો દિષ્ટં(મ્), પ્રાપ્તં(મ્) પ્રાપ્તમબુધ્યત .. ૪૧..

પરિભૂત ઇમાં(ઙ્) ગાથા-મગાયત નરાધમૈઃ .
પાતયદ્ભિઃ(સ્) સ્વધર્મસ્થો, ધૃતિમાસ્થાય સાત્ત્વિકીમ્ .. ૪૨..

દ્વિજ ઉવાચ

નાયં(ઞ્) જનો મે સુખદુઃખ હેતુર્-
ન દેવતાઽઽત્મા ગ્રહકર્મકાલાઃ .
મનઃ(ફ્) પરં(ઙ્) કારણમામનન્તિ,
સં(મ્)સારચક્રં(મ્) પરિવર્તયેદ્ યત્ .. ૪૩..

મનો ગુણાન્ વૈ સૃજતે બલીય-
સ્તતશ્ચ કર્માણિ વિલક્ષણાનિ .
શુક્લાનિ કૃષ્ણાન્યથ લોહિતાનિ,
તેભ્યઃ(સ્) સવર્ણાઃ(સ્) સૃતયો ભવન્તિ .. ૪૪..

અનીહ આત્મા મનસા સમીહતા,
હિરણ્મયો મત્સખ ઉદ્વિચષ્ટે .
મનઃ(સ્) સ્વલિં(ઙ્)ગં(મ્) પરિગૃહ્ય કામાન્,

જુષન્ નિબધ્ધો ગુણસં(ઙ્)ગતોઽસૌ .. ૪૫..

દાનં(મ્) સ્વધર્મો નિયમો યમશ્ચ,
શ્રુતં(ઞ્) ચ કર્માણિ ચ સદ્વ્રતાનિ .
સર્વે મનોનિગ્રહલક્ષણાન્તાઃ(ફ્),
પરો હિ યોગો મનસઃ(સ્) સમાધિઃ .. ૪૬..

સમાહિતં(યઁ) યસ્ય મનઃ(ફ્) પ્રશાન્તં(ન્),
દાનાદિભિઃ(ખ્) કિં(વઁ) વદ તસ્ય કૃત્યમ્ .
અસં(યઁ)યતં(યઁ) યસ્ય મનો વિનશ્યદ્-
દાનાદિભિશ્ચેદપરં(ઙ્) કિમેભિઃ .. ૪૭..

મનોવશેઽન્યે હ્યભવન્ સ્મ દેવા,
મનશ્ચ નાન્યસ્ય વશં(મ્) સમેતિ .
ભીષ્મો હિ દેવઃ(સ્) સહસઃ(સ્) સહીયાન્
યુઞ્જ્યાદ્ વશે તં(મ્) સ હિ દેવદેવઃ .. ૪૮..

તં(ન્) દુર્જયં(મ્) શત્રુમસહ્યવેગ-
મરુન્તુદં(ન્) તન્ન વિજિત્ય કેચિત્ .
કુર્વન્ત્યસદ્વિગ્રહમત્ર મર્ત્યૈર્-
મિત્રાણ્યુદાસીનરિપૂન્ વિમૂઢાઃ .. ૪૯..

દેહં(મ્) મનોમાત્રમિમં(ઙ્) ગૃહીત્વા
મમાહમિત્યન્ધધિયો મનુષ્યાઃ .
એષોઽહમન્યોઽયમિતિ ભ્રમેણ
દુરન્તપારે તમસિ ભ્રમન્તિ .. ૫૦..

જનસ્તુ હેતુઃ(સ્) સુખદુઃખયોશ્ચેત્,
કિમાત્મનશ્ચાત્ર હિ ભૌમયોસ્તત્ .
જિહ્વાં(ઙ્) ક્વચિત્ સં(ન્)દશતિ સ્વદદ્ભિસ્-
તદ્વેદનાયાં(ઙ્) કતમાય કુપ્યેત્ .. ૫૧..

દુઃખસ્ય હેતુર્યદિ દેવતાસ્તુ
કિમાત્મનસ્તત્ર વિકારયોસ્તત્ .
યદં(ઙ્)ગમં(ઙ્)ગેન નિહન્યતે ક્વચિત્
ક્રુધ્યેત કસ્મૈ પુરુષઃ(સ્) સ્વદેહે .. ૫૨..

આત્મા યદિ સ્યાત્સુખદુઃખહેતુઃ(ખ્),
કિમન્યતસ્તત્ર નિજસ્વભાવઃ .
ન હ્યાત્મનોઽન્યદ્ યદિ તન્મૃષા સ્યાત્
ક્રુધ્યેત કસ્માન્ન સુખં(ન્) ન દુઃખમ્ .. ૫૩..

ગ્રહા નિમિત્તં(મ્) સુખદુઃખયોશ્ચેત્,
કિમાત્મનોઽજસ્ય જનસ્ય તે વૈ .
ગ્રહૈર્ગ્રહસ્યૈવ વદન્તિ પીડાં(ઙ્),
ક્રુધ્યેત કસ્મૈ પુરુષસ્તતોઽન્યઃ .. ૫૪..

કર્માસ્તુ હેતુઃ(સ્) સુખદુઃખયોશ્ચેત્-
કિમાત્મનસ્તદ્ધિ જડાજડત્વે .
દેહસ્ત્વચિત્ પુરુષોઽયં(મ્) સુપર્ણઃ(ખ્)
ક્રુધ્યેત કસ્મૈ ન હિ કર્મમૂલમ્ .. ૫૫..

કાલસ્તુ હેતુઃ(સ્) સુખદુઃખયોશ્ચેત્-
કિમાત્મનસ્તત્ર તદાત્મકોઽસૌ .
નાગ્નેર્હિ તાપો ન હિમસ્ય તત્ સ્યાત્,
ક્રુધ્યેત કસ્મૈ ન પરસ્ય દ્વન્દ્વમ્ .. ૫૬..

ન કેનચિત્ ક્વાપિ કથં(ગ્)ચનાસ્ય,
દ્વન્દ્વોપરાગઃ(ફ્) પરતઃ(ફ્) પરસ્ય .
યથાહમઃ(સ્) સં(મ્)સૃતિરૂપિણઃ(સ્) સ્યા-
દેવં(મ્) પ્રબુદ્ધો ન બિભેતિ ભૂતૈઃ .. ૫૭..

એતાં(મ્) સ આસ્થાય પરાત્મનિષ્ઠા-
મધ્યાસિતાં(મ્) પૂર્વતમૈર્મહર્ષિભિઃ .
અહં(ન્) તરિષ્યામિ દુરન્તપારં(ન્),
તમો મુકુન્દાઙ્ઘ્રિનિષેવયૈવ .. ૫૮..

શ્રીભગવાનુવાચ
નિર્વિદ્ય નષ્ટદ્રવિણો ગતક્લમઃ(ફ્)
પ્રવ્રજ્ય ગાં(મ્) પર્યટમાન ઇત્થમ્ .
નિરાકૃતોઽસદ્ભિરપિ સ્વધર્મા-
દકમ્પિતોઽમું(મ્) મુનિરાહ ગાથામ્ .. ૫૯..

સુખદુઃખપ્રદો નાન્યઃ(ફ્), પુરુષસ્યાત્મવિભ્રમઃ .
મિત્રોદાસીનરિપવઃ(સ્), સં(મ્)સારસ્તમસઃ(ખ્) કૃતઃ .. ૬૦..

તસ્માત્ સર્વાત્મના તાત, નિગૃહાણ મનો ધિયા .
મય્યાવેશિતયા યુક્ત, એતાવાન્ યોગસં(ઙ્)ગ્રહઃ .. ૬૧..

ય એતાં(મ્) ભિક્ષુણા ગીતાં(મ્), બ્રહ્મનિષ્ઠાં(મ્) સમાહિતઃ .
ધારયઞ્છ્રાવયઞ્છૃણ્વન્, દ્વન્દ્વૈર્નૈવાભિભૂયતે .. ૬૨..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયામેકાદશસ્કન્ધે ત્રયોવિં(મ્)શોડધ્યાયઃ ..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

